Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 4 | ISSN : 2582-0095

# हर्षवर्धनकृतनाटकानां संक्षिप्तसामाजिकसंघटनस्य स्वरुपम्

आनन्द कुमार
असि.प्रो. , संस्कृत-विभाग
राजकीय महिला महाविद्यालय,
राबर्ट्सगंज सोनभद्र

शोधालेखसारः– नारीणां दशा अधोलिखितं विद्यते- वत्सराजस्य पट्टमहिष्या वासवदत्तायाःविशिष्टतं स्थानं वर्णितं स्वनाटकेषु श्रीहर्षवर्धनेन ,कथानकस्यावलोकनेनपरिज्ञायते यत् वासवदत्तायाःसम्मुखे महाराजो वत्सराजो अपि स्वप्रभुत्वं स्थापयितुं न समुत्सहते स्म[1]। गुप्तकालसदृशेव मध्ये कुलीनगृहिणीनां दशा सन्तोषप्रदा आसीत् । परन्तु सामान्यस्त्रीसमाजस्य दुर्दशायाः अस्मिन्नेव काले समारम्भः जातः।

मुख्य शब्द– नारीणां, दशा, स्थानं, वर्णितं, स्वनाटकेषु, स्वप्रभुत्वं|

**वर्णव्यवस्था-** विभिन्नजातिर्वर्णसम्प्रदायै विभक्तस्य समाजस्य यादृशी दशा साम्प्रतं विद्यते सप्तम शताब्दाद्यामपि तद्वदेवासीत् । मध्यकालिकस्य सामाजिकजीवनस्येयं महती विशेषता आसीत् यत् प्राचीनवर्णव्यवस्थायाः स्वरुपं कार्यविशेषमाधारीकृत्य समुत्पन्नेषु नवीनतमेषु जातिगतरुपेषु परिणतं जातम् । विविधसंस्कृतिविशिष्टस्य समाजस्य स्वकीय सांस्कृतिकमहोदधौ निगरणं कृत्वा भारतीयसमाजौ मध्यकाले स्वात्मविलीनीकरणरुपात् कार्यादुपरतो जातः । परस्परं भोजनविवाहजीविकारुपेणोत्तममध्यमाधामानां विविधजातीनां परिकल्पनं कृतं हिन्दूसमाजनेन। चतुर्वर्णव्यवस्थान्तर्गते ब्रह्माणानां प्रथमं सर्वपूज्यं स्थानमासीत् । देवाराधानाध्ययनरुपैः कार्यैः समाजस्य नैतिकाभ्युदयं प्रति ब्रह्मणानामुत्तरदायित्वमासीत् परन्तु विशिष्टासु परिस्थितीषु कृषियुद्धादिकेषु वर्णेतरभ्यो निर्धारितेष्वपरेष्वपि व्यापारेषु ब्रह्माणानां गतिरासीत् । नैके ब्रह्माणाः तात्कालिकेषु राज्येषु सेनापतिपदमलंकुर्वन्ति स्म।प्रधानामात्येषु पदेषु तु प्रायशो ब्रह्मणजना एवाभिषिक्ता दरीदृश्यन्ते स्म ।कर्मकाण्डगतेन संस्कारप्रक्रियया शुद्धिकरणं ब्रह्मणस्य महत्त्वपूर्णं कार्यमासीत् [2]।

---

1 राजा.....देव्याः प्रसादं मुक्त्वा नान्यस्तस्याः मोक्षाणाभ्युपायः...तथा राजा देवी प्रभवति।कुतो अस्माकमन्यथा कर्तुं विभवः।**प्रियदर्शिकायांचतुर्थःअङ्कः**

2 कृतोपनयनादिक्रियाकलापस्य...........श्रुति स्मृतिविहितं कृत्वा द्विजजनोचितं पुण्यजातम् । **हर्षचरिते, प्रथमोच्छ्वासः ।**

**१.ब्रह्मणवर्णम्** - राजकीयसभायां साधारणजनेषु च सर्वत्रैव द्विजातीनां पूज्यतमं स्थानमासीत्[3] । देवतानां पूजनसमये, व्रतोपवासादिके , विशिष्टावसरे प्रत्यक्षदेवतारुपेण ब्रह्मणानां गौरवगरिष्ठं पदं तात्कालिके समाजे संल्क्ष्यते स्म।प्रियदर्शिकानाटकायां व्रतोपवसाभ्यां विगलितशरीरा सामग्री वासवदत्ता ब्रह्मणार्चनं विना अन्यस्मिन् कार्येदत्तचित्ता न जायते स्म[4] ।

वेदाध्ययनपरायणानां कर्मकाण्डनिरतानां केषाञ्चित् तादृशानां जनानां वर्णनं लिपिबद्धं वर्तते स्म । तात्कालिकेषु संस्कृतसाहित्येषु ये वर्णेतरर्जनैः सह भोजनादिषु व्यापारेषु सम्मिलितं न समुत्सहन्ते स्म । परस्पराणां स्पृश्यास्पृश्यविवराणां प्राबल्यमासीतुपर्युक्तोदाहरणेनेति परिज्ञायते।

**२. क्षत्रियवर्णम्**-सामाजिकव्यवस्थायां महत्त्वक्रमानुसारं ब्रह्मणानुवर्तिरेव क्षत्रियाणां प्रतिष्ठा आसीत् । शक्त्या निर्बलानां जनानां संरक्षणे पुरस्कारादिना विद्वज्जनानां सम्माने , काव्यशास्त्रविनोदे च क्षत्रियवर्णजनारता आसन्। स्वकीयवीरत्वगुणाधिक्यात्वात् प्रायशो राजशासनपदवीमलंकुर्वन्ति स्म ।विरमितेषु युद्धादिकेषुजीवननिर्वाहार्थं कृषिकर्मनिरतानां क्षत्रियसैनिकानां वर्णनं लभ्यते तात्कालिकैतिहासिकेषु , एतेन परिज्ञायते यन्न केवलं रणक्षेत्रे अपितु कृषिक्षेत्रादिके अपि क्षत्रियणां गतिरासीत् ।

**३. वैश्यवर्णम्** – प्रचीनकाले वाणिज्येन सह कृषिकार्यमपि वैश्यानां मुख्यकार्यमासीत् ।सप्तशताब्द्यां वैश्यजनाः मुख्यरुपेण वाणिज्यवृत्येव स्वजीवनपालनं कुर्वन्ति स्म[5] ।हर्षवर्धनकृतायां रत्नावलीनाटिका यामेकत्र भग्ने जलयाने यदा रत्नावली समुद्रे पतिता जाता तदा व्यापाराय परिभ्रमणशीलेन कौशाम्बीस्थेन व्यापारिवर्गेण तस्याः संरक्षणमजायत ।

**४.शूद्रवर्णम्**-तत्साहित्येषु यद्यपि शूद्र वर्णनानां कृते वेदाध्ययनादिषु द्विजातिनिर्दिष्टकार्येषु च निषेधस्यैव व्यवस्था दरीदृश्यते । परन्तु सामाजिकसंघटनस्य सञ्चालने शूद्राणामपि महत्त्वपूर्णा भूमिका आसीत् । न केवला परम्परा प्राप्तेषु कार्येष्वपितु हस्तकलादिकेषु वर्णेतराणां निर्धारितेषु वृत्तिषु तेषां सौन्दर्योपासकत्वं कलापटुत्वञ्च दरीदृश्यते । कृषिकर्मादिरुपेषु शूद्रवर्णभ्यो निर्धारितेषु कार्येषु संलग्नानां शूद्राणां मध्ये वधिकचाण्डालमृतपादसंज्ञकानां शूद्राणां स्थानमस्पृश्यरुपेणासीत् ।ह्वेनसांगमहोदयानुसारेण परिज्ञायते यदेतेषां निवासस्थानं ग्रामात् बहिर्भागेष्वासीत् ।

**वैवाहिकसम्बन्धस्वरुपम्**

तत्समाजे विवाहितानां स्त्रीपुरुषाणां सन्तोषजनकं स्थानं नासीत् । विवाहः स्वचारित्रयस्य सदाचरणस्य च प्रमाणमासीत् । ये अविवाहिता आसन् तान् सशङ्कदृष्ट्या अवलोकयति स्म जनाः । हर्षवर्धनकृतनाटकेषु शिक्षासङ्गीतादिकानां परिशीलनं कृत्वा युवतियुवाजनेषु वयः प्रौढतासमागते सति तेषां विवाहस्य प्रचलनं दरीदृश्यते[6] ।यद्यपि सामान्यतया विवाहसंस्कारस्य सम्पादने पित्रादिगुरुजनामेव दायित्वमासीत् परन्तु

---

3 .....जितमुडुपतिना नम सुरेभ्यो द्विजवृषभा......। **रत्नवल्याम् १/५**

4 .....मम उण बह्मणस्य वसोत्थिवा अणवलां आदिक्कमदि...। **प्रियदर्शिकायाम् पृ० ३७**

5 क्व सिद्धादेशप्रत्ययप्रार्थितायाःसिंहलेश्वरदुहितुः समुद्रे यानभङ्गमग्नोत्थितायाः फलकासादनं क्व च कौशाम्बीयेन वणिजा सिंहलेभयः प्रत्यगच्छता...। **रत्नवल्यां प्रथमो अङ्कः ।**

6 यदेषा विन्ध्यकेतुदुहिता वरयोग्या भविष्यति तदा अहं स्मारयितव्यः।**प्रियदर्शिकायां द्वितीयो अङ्कः**

क्षत्रियाणां मध्ये गान्धर्वविवाहस्यापि प्रचलनमासीत्[7]।गुरुजनानामनुज्ञां विनैव स्त्रीपुरुषयोर्मध्ये सञ्जातविवाहानां बहून्युदाहरणानि दरीदृश्यन्ते ।हर्षवर्धनकृतेषु रुपकत्रयेषु नायकनायिकायोर्मध्ये गान्धर्वविवाहस्यसङ्केतो विद्यते ।

बालविधवाविवाहयोः न प्रचलनमासीतिदानीं तथापि न्यूनावस्था यामेव गतानां बालकबालिकानां विवाहसम्बन्धस्तेषां गुरुजना सम्पादयन्ति स्म ।यद्यपि प्रियदर्शिकादिभिः नायिकादिभिः सह वत्सराजस्य गान्धर्वो विवाहः सञ्जातः परन्तु गान्धर्वविवाहात्पूर्वमेव तयोर्मध्ये विवाहस्यानुमतिरपि प्रदत्ता आसीत् महाराजेण दृणवर्मणा[8]।

**आश्रमव्यवस्था**

ऐहिकामुष्मिकफलं सम्प्राप्तये ब्रह्मचर्यगृहस्थवानप्रस्थसंन्याससंज्ञकानां चतुर्णामाश्रममाणां परिकल्पनं स्मृतिकारैः। अत एव प्रथममित्थम्-

**१. ब्रह्मचर्याश्रमः-** जीवनयात्रासफलीकर्तुं गुरुजनानां स्वानुभूतेन कृपाप्रसादेन पूर्णा परिपक्वतासमागच्छति जनेषु , उपर्युक्तेन कारणेनैव ब्रह्मचर्यस्य व्यवस्थानिरुपिताः स्मृतिकारैः । ब्रह्मचर्यावस्थायां गुरोगृहमेवाधिसवसद्भ्यः तेषामेव परिवारजनस्य सेवां छात्रेभ्यःशिक्षां ददाति स्म गुरवः ।

**२.गृहस्थाश्रमः**-स्मृतिषु निर्दिष्टनियमानुसारं शिक्षां गृहीत्वा स्वगृहागतानां तरुणानां समावर्तनसंस्कारेण गृहस्थाश्रमे प्रवेशः सञ्जायते स्म।अस्मिन् एवाश्रमे विवाहादिकं संस्कारं कृत्वा सन्तानोत्पादेनेन देवर्षिपितृणां गुरुजनानां सेवया च सामाजिकसुखसमृद्धये सर्वे जनाः निरतारासन् ।गृहस्था एवेतराश्रामेषु गतान् जनान् स्वगृहागतांश्च भोजनद्रव्यवस्त्रादिभिःपरिपालयन्ति स्म।तत्समाजे मखादिकेषु कार्येषु महत्त्वपूर्णा भूमिका गृहजनानां दृश्यते ।एतैर्विना कानिचिदपि महत्त्वपूर्णानि कर्माणि न सम्पद्यन्ते स्म ।

**३. वानप्रस्थाश्रमः** - गृहस्थजीवनसमय एव शिक्षादिकं गृहीत्वा स्वगृहागतानां तरुणानां पुत्राणां मातृपितृभ्यां वानप्रस्थाश्रमे प्रवेशो विधाय इति स्मृतीनां समावेशः आसीत् । अस्मिन् आश्रमे भोगाभोगयोः सम्मिश्रणं परिलक्ष्यते।गृहस्थ कर्तव्यं कुर्वतापि जनेन मुनिवृत्तिरपि स्वीकर्तव्या । गृहमुनीति शब्देन वानप्रस्थाश्रमगतस्यैव जनस्य महाकविबाणभट्टः सङ्केतो ददाति[9]।

**४. संन्यासाश्रमः**-जनाः स्वकीयजने विविधप्रकाराणां सुखदुःखादीनां वेदानामनुभूय संन्यासाश्रम एव भगवत्याः शान्तिदेव्याः परिदर्शनं कुर्वन्ति स्म । हर्षवर्धनकृते नागानन्दनाटके भौतिकसुखपभोगे निरुत्साहितेन जीमूतकेतुना संन्यासाश्रमस्योदाहरणं चित्रितं जायते ।

**नारीणांदशा**

नारीणां दशा अधोलिखितं विद्यते- वत्सराजस्य पट्टमहिष्या वासवदत्तायाःविशिष्टतं स्थानं वर्णितं स्वनाटकेषु श्रीहर्षवर्धनेन ,कथानकस्यावलोकनेनपरिज्ञायते यत् वासवदत्तायाःसम्मुखे महाराजो वत्सराजो अपि स्वप्रभुत्वं

---

7 .....धर्मशास्त्रविहित-एष गान्धरवोविवाहः .....क्षत्रियस्य तु गान्धर्वो विवाहः श्रेष्ठः उच्यते । **प्रियदर्शिकायां सटीकः तृतीयो अङ्कः**

8 अ अं क्खु सो महाराजो जस्स अहं तादेण दिण्णा । ठाणे क्सु तादस्स पक्खवादो । **प्रियदर्शिकायां द्वितीयो अङ्कः**

9 यस्मादजायन्त वात्सायनो नाम गृहमुनयः ......। **हर्षचरिते प्रथमो उच्छ्वासः**

स्थापयितुं न समुत्सहते स्म[10]।गुप्तकालसदृशेव मध्ये कुलीनगृहिणीनां दशा सन्तोषप्रदा आसीत् ।परन्तु सामान्यस्त्रीसमाजस्य दुर्दशायाः अस्मिन्नेव काले समारम्भः जातः।बहुपत्नीत्वप्रथाप्रचलनेनोक्तस्य मतस्य समर्थनं भवति।अनेकस्त्रीसमन्वितो अपि राजा अपराभिः स्त्रीभिःसह रमणार्थं स्वतन्त्रो दरीदृश्यते।प्रियदर्शिकारत्नावलीनाटिकाद्वये अस्य पुष्कलं प्रमाणं वरीवर्ति[11]। यद्यपि वासवदत्तायाः परोक्षे वत्सराजस्य प्रेपरिपाको भवति परन्तु प्रियदर्शिकारत्नावलीभ्यां सह विवाहेन तत्कालस्य राजकीयस्वरुपस्य नैर्मल्यं स्त्रीणां व्यक्तित्वं न प्रतिभाति।कुलीनां नारीणां कृते संगीतकलाकविषयविशेषे शिक्षणस्य व्यवस्था आसीत्[12]।हर्षवर्धनेन स्वकीयरुपकेषु संगीतकलाचित्रकलादिविषयेषु पाटवस्य वर्णनं कृतम्।न केवलोच्चवंशोत्पन्नाः नार्यः अपितु साधारणस्त्रियः नृत्यादिकेषु प्रवीणा आसन्[13]।प्रत्येकवर्णेषु समुत्पन्नाः सर्वा एव स्त्रियः प्रायशः सुशीलाः सुशिक्षिताः सच्चारित्रयसमन्विताः च दरीदृश्यन्ते स्म[14]।

---

10 राजा.....देव्याः प्रसादं मुक्त्वा नान्यस्तस्याः मोक्षाणाभ्युपायः...तथा राजा देवी प्रभवति।कुतो अस्माकमन्यथा कर्तुं विभवः।**प्रियदर्शिकायांचतुर्थःअङ्कः**

11 मनोरमा- हला अपिण्डदे, कमलिणीबद्धापुराओ वि महुअरो मालदीं पेक्खिअ अहिणवरसा सादलम्पडो कुदो तं दिटदिं करेदि। **प्रियदर्शिकायां तृतीयो अङ्कः**

12 गीतनृत्तवाद्यादिषु विशिष्टकन्यकोचितं सर्वं शिक्षयितव्या।**प्रियदर्शिकायां प्रथमो अङ्कः**

13 महुमत्तकामिणीजणस अंग्गहगहिदसिड्गकजलप्पहारणच्चन्तणाअरजणजणिदको दूहलस्स .....।**रत्नावल्यांअङ्कः**

14 सहलज्जाधनस्य प्रमदाजनस्य प्रथमाभिभाषणमशालीनता, विशेषतो वनमृगीमुग्धस्य कुलकुमारीजनस्य। **हर्षचरिते, प्रथमोच्छ्वासः।**